श्रीः

श्रीवाग्देवतायै नमः

# कृदन्तरूपमाला

(1) जगन्माता परा शक्तिर्भजतामिष्टदायिनी ।
कुरुताद् भावुकं देवी शब्दब्रह्मस्वरूपिणी ॥

(2) पाणिनिं परमाचार्यं कात्यायनमुनिं तथा ।
भाष्यकारं फणीशं च नमामि सततं गुरून् ॥

(3) शङ्कराभिख्यया ख्यातौ श्रौतस्मार्तक्रियारतौ ।
पितरावन्वगृह्णीतां माम्, अहं तौ सदा भजे ॥

(4) श्रीदण्डपाणिमखिनामखिलागमवेदिनाम् ।
अव्याजकृपयाऽवाप्ता पाणिनीये नये मतिः ।

(5) आलम्ब्य तां यथाबुद्धि प्राचीनार्यैर्विनिर्मितान् ।
ग्रन्थान् संशील्य यत्नेन कृदन्तानां प्रदर्शिका ॥

(6) पाणिनीयमहासूत्रग्रथिता सुमनोहरा ।
कृदन्तरूपमालेयं गुम्फिता सुधियां मुदे ॥

(7) अत्यन्तक्लेशजटिलं कार्यं यत्साधितं मया ।
विबुधामोदनं तस्य पर्याप्तं पारितोषिकम् ॥

(8) कोट्टारग्रामसम्भूतरामसुब्बाख्यशास्त्रिणा ।
कृदन्तरूपमालेयं रचिता जयताद्भुवि ॥

---